# मातृ पंचकं

आस्तां तावदियं प्रसूति समये दुर्वार शूलव्यथा
नैरुच्यं तनुशोषणं मलमयी शय्या च सांवत्सरी ।
एकस्यापि न गर्भ भारभरण क्लेशस्य यस्या क्षमः
दातुं निष्कृति मुन्नतोऽपि तनय स्तस्यै जनन्यै नमः ॥ ३॥

गुरुकुल मुपसृत्य स्वप्नकाले तु दृष्ट्वा
यति समुचित वेशं प्रारुदो मां त्वमुच्चैः ।
गुरुकुल मथ सर्वं प्रारुदत्ते समक्षं
सपदि चरणयोस्ते मातरस्तु प्रणामः ॥ ४॥

न दत्तं मातस्ते मरण समये तोयमपिवा
स्वधा वा नो दत्ता मरण दिवसे श्राद्ध विधिना ।
न जप्त्वा मातस्ते मरण समये तारकमनुः
अकाले सम्प्राप्ते मयि कुरु दयां मातु रतुलाम् ॥ ५॥

मुक्तामणि त्वं नयनं ममेति
राजेति जीवेति चिरं सुत त्वम् ।
इत्युक्तवत्या स्तव वाचि मातः
ददाम्यहं तण्डुल मेव शुष्कम् ॥ १॥

अम्बेति तातेति शिवेति तस्मिन्
प्रसूतिकाले यदवोच उच्चैः ।
कृष्णेति गोविन्द हरे मुकुन्द
इति जनन्यै अहो रचितोऽयमञ्जलिः ॥ २॥